# JAIN COLLEGE

463/465, 18th Main Road, SS Royal, 80 Feet Road, Rajarajeshwari Nagar,
Bangalore - 560 098

**Date:** **SUBJECT: SANSKRIT**

***II PUC***
***MOCK - II***

***Timings Allowed: 3 Hrs15Minutes*** ***Total Marks: 100***

I. एकवाक्येन संस्कृतभाषया उत्तरं लिखत। 10×1=10.

1) अद्यापि देवाः कुत्र जन्म इच्छन्ति ?
2) विक्रमादित्यकथां का कथयति ?
3) प्रव्राजकः वणिजः गृहं किमर्थम् अगच्छत ?
4) मूर्तिमति सत्क्रिया का ?
5) राणाप्रतापस्य पूर्वजानाम् अमात्यः कः ?
6) महाश्वेता स्नातुं कुत्र आगच्छति ?
7) सुन्दरस्य पिता कः ?
8) कर्णस्य रक्षाकवचं किम् ?
9) कामधेनुगुणा का ?
10) कृष्णशास्त्रिणाम् अध्यापकेषु एकस्य नाम लिखत।

II. द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत। 5×2=10.
[पञ्चानामेव]

11) भारतवर्षं इति किमर्थं कथ्यते ?
12) कन्याविषये परिव्राट् वणिजः सकाशे किं वदति ?
13) भिल्लाः राणाप्रतापं कथं साहाय्यम् अकुर्वन् ?
14) सुन्दरः किमर्थं स्वग्रामं त्यक्तवान् ?
15) कोषः किमर्थं संरक्ष्यः ?
16) कृष्णशास्त्रिणां कन्नड-साहित्यसेवा।
17) वज्राख्यः कीटः किं करोति ?

III. पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नड-आङ्ग्लभाषया वा कुरुत। 3×3=09.
[त्रयाणामेव]

18) भारतस्यास्य वर्षस्य नवभेदान्निबोधत।
समुद्रान्तरिता ज्ञेयास्ते त्वगम्याः परस्परम्॥

19) तथेति प्रतिपद्यैतद् गत्वा सोऽथ वणिग्भयात् ।
नक्तं चक्रे तथा सर्वं निर्विमर्शा हि भीरवः ॥

20) मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये ।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः ॥

21) धनहीनो न हीनश्च धनिकः स सुनिश्चयः ।
विद्यारत्नेन यो हीनः स हीनः सर्ववस्तुषु ॥

22) अस्त्रप्रयोगवेलायां यदा ते सूतभावना ।
तदा सर्वाणि चास्त्राणि भवेयुर्निष्फलानि हि ॥

IV. पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत । 4x2=08
[चतुर्णामेव]

23) यं कमेवं मा भक्षय ।
24) सुखानि ते भर्तृकुलदेवताः वितरन्तु ।
25) मम जीवनं सार्थकं भवेत् ।
26) तथापि यदि कुतूहलम्, तत् कथयामि ।
27) अहो! गुरुकुलवैभवम् ।
28) सः यत्रकुत्रापि भवतु कालेज् आनेतव्य एव ।

V. दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत । 5x5=25
[पञ्चानामेव]

29) दुष्यन्तस्य पात्रचित्रणं कुरुत ।
30) विक्रमादित्यस्य प्रभावेण राक्षसः कथं परिवर्तितः?
31) पुण्डरीक-महाश्वेतयोः सरससंवादः ।
32) शान्तिदर्शनात् तरुणस्य चिन्तासन्ततिः ।
33) कर्णशापप्रसङ्गः ।
34) रोटिकाप्रसङ्गः ।
35) दीर्घापाङ्गप्रसङ्गः ।
36) शास्त्रिणाम् शिष्यवात्सल्यम् ।

मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत । 4×1=4

37) सर्वे सगन्धेषु ------ ।

38) वैरिणां ------- समुद्रोपमम् आसीत् ।

39) भवादृशा गुरवः अतीव ------- ।

40) विद्या ------- रक्ष्यते ।

[ योगेन , विरलाः, सैन्यं, विश्वसिति ]

VII. 41) संयोजयत । 4×1=4

| क | ख |
|---|---|
| पुष्पितः | ब्रह्मा |
| गोविन्दः | वृक्षः |
| सिसीदिया | बहुपत्यः |
| प्रजापतिः | राणाहमीरः |

VIII. रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत । [त्रयाणामेव] 3×1=3

42) भाषासाहित्यविद्यार्थिभिः संस्कृतभाषा अध्येतव्या एव ।

43) उद्योगाः अस्मत् प्रतीक्षायां न तिष्ठन्ति ।

44) 'मेवाड' इति स्थलं राजस्थाने प्रसिद्धमासीत् ।

45) ऋषयः प्रसन्नमुखवर्णाः दृश्यन्ते ।

46) परिव्राट् मौनं त्यक्त्वा उक्तवान् ।

IX. यथानिर्देशं कुरुत । [चतुर्णामेव] 4×3=12

47) सन्धिं विभजत / संयोजयत [त्रयाणामेव]

षट् + मुखः , अङ्कितः , ऋग्वेदः, शरच्चन्द्रः , गुरु + आज्ञा

48) विग्रहवाक्यं / समस्तपदं लिखत । [त्रयाणामेव]

फलागमैः, वणिजः कन्या , क्रमम् अनुगम्य, अच्छोद इति सरः

49) लिङ्ग-विभक्ति-वचनानि लिखत । [द्वयोरेव]

सलिलम्, मया, विद्या, रोटिकाम्

50) लकार-पुरुष-वचनानि लिखत । [द्वयोरेव]

अब्रवीत्, धारयन्ति, विद्यते, कुर्वन्ति ।

51) वाक्यदोषं परिहरत ।

i) जलात् अन्तरा मीना न वसन्ति ।

ii) तस्य विना तृणमपि न चलति ।

iii) भवान् गन्तुम् अर्हसि ।

52) प्रयोगं परिवर्तयत ।

किमेतत् आचरितं त्वया ।

अथवा

मया मुनिकुमारकः अदृश्यत ।

53) अलङ्कारं सलक्षणं निर्दिशत ।

विद्या प्रवासे मातृसदृशी ।

अथवा

काश्यपेन ते प्रेषितवन्तः ।

54. कन्नडभाषया - आङ्ग्लभाषया वा अनुवदत । 5.

रात्रिर्गता । प्रभातं रमणीयं दृश्यं दृष्टिगोचरं कारयति । नक्तं प्रकाशमानाः ताराः सूर्य मन्दप्रकाशाः सञ्जाताः तिरोहिताश्च । सर्वत्र प्रकाशः प्रसरति । अन्धकारः नष्टः । पक्षिणां मधुरं कूजनं सर्वासु दिक्षु व्याप्तम् । प्रातःकाले शुद्धो वायुः वाति । सर्वेषाम् उत्साहं वर्धयति ।

55. संस्कृतभाषया अनुवदत । 5.

ವಾರಾಣಸಿಯು ಗಂಗಾನದಿಯ ದಡದಲ್ಲಿದೆ. ಅದು ದೇವಾಲಯ, ರೇಷ್ಮೆ ವಸ್ತ್ರ ಮತ್ತು ಘಟ್ಟಗಳಿಗಾಗಿ (ಘಾಟ್) ಪ್ರಸಿದ್ಧವಾಗಿದೆ. ಇದು ಭಾರತದ ಪ್ರಾಚೀನನಗರಗಳಲ್ಲೊಂದು. ಇದು ಭಾರತದ ಪ್ರಸಿದ್ಧ ಯಾತ್ರಾಸ್ಥಳ. ದೇಶದ ಎಲ್ಲಾಭಾಗಗಳಿಂದ ಜನರು ಇಲ್ಲಿಗೆ ಬರುವರು. ಅವರು ಗಂಗಾನದಿಯಲ್ಲಿ ಸ್ನಾನ ಮಾಡಿ ವಿಶ್ವನಾಥ ದರ್ಶನವನ್ನು ಪಡೆದು ತಮ್ಮ ಜನ್ಮ ಸಾರ್ಥಕವಾಯಿತೆಂದು ಭಾವಿಸುವರು.

Banares is on the banks of the river Ganga. It is famous for its temples. silk and ghats. It is one of the most ancient cities. It is a famous pilgrim centre in India. People from all parts of the contry visit the place. They take bath in the river Ganga, having visited the Vishwanatha temple. They feel that their life is fulfilled.

56. इमं परिच्छेदं पठित्वा प्रश्नानाम उत्तराणि लिखत। 5×1=5

संस्कृत विद्या वस्तुतः भारतीय विद्या। भारती च संस्कृतिः। इयं विश्वभाषासु एका पुरातनी वाक्। संस्कृत साहित्यम अत्यन्तसम्पन्नम्। नीति सदाचार विषयकं अत्युदार - उच्चविचार परिप्लुतं गीर्वाण साहित्यविश्वम। सर्वेऽपि सुखिनः सन्तु इति संस्कृत संस्कृतानाम उद्घोषः। भारतीय तत्त्वज्ञानस्य ऊर्जस्वलः आविष्कारः अत्रैव दृश्यते। अन्यच्च संस्कृत-साहित्यं सुतरां मौलिकम। तस्याः उच्चस्वर पठनेन स्पष्टा उच्चाराः सर्वाकर्णनीयाः भवन्ति। राष्ट्रस्य भावनात्मक-ऐकमत्य साधनार्थं निश्चितं। संस्कृत भाषा एकं साधनमिति विदुषां विश्वासः।

1. वस्तुतः संस्कृतविद्या कीदृशी?
2. संस्कृत संस्कृतानाम उद्घोषः कः?
3. सुतरां मौलिकं किम?
4. तस्याः उच्चस्वरपठनेन किं किं भवन्ति?
5. संस्कृत भाषा विषये विदुषां विश्वासः कः?

<u>अथवा</u>

मित्रं प्रति पत्रमेकं लिखत।

—o—